चर्तिता-त्री, चर्तयिता-त्री, चिचर्तिषिता-चिचृत्सिता-त्री, चरीचृतिता-त्री ;
[1]चृतन्-न्ती-ती, चर्तयन्-न्ती, चिचर्तिषन्-चिचृत्सन्-न्ती ; —
[2]चर्तिष्यन्-चर्त्स्यन्-न्ती-ती, चर्तयिष्यन्-न्ती-ती, चिचर्तिषिष्यन्-चिचृत्सिष्यन्-न्ती-ती ; —
— चर्तयमानः, चर्तयिष्यमाणः, — चरीचृत्यमानः, चरीचृतिष्यमाणः ;
चृत्-चृतौ-चृतः ; — — —
[3]चृत्तम्[A]-चृत्तः-चृत्तवान्, चर्तितः, चिचर्तिषितः-चिचृत्सितः, चरीचृतितः-तवान् ;
[4]चृतः, चर्तः, चिचर्तिषुः-चिचृत्सुः, चरीचृतः ;
चर्तितव्यम्, चर्तयितव्यम्, चिचर्तिषितव्यम्-चिचृत्सितव्यम्, चरीचृतितव्यम् ;
चर्तनीयम्, चर्तनीयम्, चिचर्तिषणीयम्-चिचृत्सनीयम्, चरीचृतनीयम् ;
[5]चर्त्यम्, चर्त्यम्, चिचर्तिष्यम्-चिचृत्स्यम्, चरीचृत्यम् ;
ईषच्चर्तः-दुश्चर्तः-सुचर्तः ; — —

---

1. 'तुदादिभ्यः—' (3-1-77) इति शः। तस्य ङिद्वद्भावादङ्गस्य गुणो न। त्रियाम्, 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पः।

2 'सेऽसिचि कृतचृत—' (7-2-57) इति इड्विकल्पः। तेन रूपद्वयम्।

3. 'श्वीदितो निष्ठायाम्' (7-2-14) इतीण्णिषेधः। यद्यपि सकारादावार्धधातुके, 'सेऽसिचि कृतचृत—' (7-2-57) इत्यनेन इड्विकल्पनात्, 'यस्य विभाषा' (7-2-15) इत्यनेन निष्ठायामिण्णिषेधः सिद्धः: तथापि, धातोरीदित्करणेन, 'यस्य विभाषा' (7-2-15) इति प्राप्तस्येण्णिषेधस्यानित्यत्वं बोध्यते। तेन, **धावितम्, पतितः** इत्यादिषु निष्ठायाम् इड्घटितरूपसिद्धिः। आद्ये, **'धावु'** धातोरुदित्त्वेन, क्त्वायां विकल्पितेट्कत्वेन निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधेन भाव्यम्। अन्त्ये, 'तनि**पति**दरिद्रातिभ्यः सनो वा इड् वक्तव्यः' (वा. 7-4-54) इति **पत**धातोस्सनि विकल्पितेट्कत्वात्, निष्ठायां इण्णिषेधो न्याय्यः। अनित्यत्वेन समाधेयम्। 'द्वितीयाश्रितातीत**पतित**गतात्यस्तप्राप्तापन्नैः' (2-1-24) इत्यत्र **पतित** इति निपातनमप्यस्यैवानुकूलम्।

4. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कप्रत्ययः।

5. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इत्यत्र **'अचृतेः'** इति पर्युदासात् 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यति **'चर्त्यम्'** इति भवति।

A. 'पीयूषोभितहेमकुम्भविलुभद्वक्षोजजृम्भत्तमा दृब्धस्रग्धरचृत्तकैश्यविधितां शोभां जुडन्त्योऽजुनन्।' धा. का. 2-75.